# श्री लक्ष्मीनृसिंह करावलंब स्तोत्रं

श्रीमत्पयोनिधि निकेतन! चक्रपाणे!
भोगींद्र भोगमणिराजित! पुण्यमूर्ते ।
योगीश! शाश्वत! शरण्य! भवाब्धिपोत!
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 1

ब्रह्मेंद्र रुद्र मरुदर्क किरीटकोटि
संघट्टितांघ्रि कमलामलकांति कांत! ।
लक्ष्मी लसत्कुच सरोरुह राजहंस!
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 2

संसार दाव दहनाकुल भीकरोरु
ज्वालावलीभिरतिदग्ध तनूरुहस्य ।
त्वत्पादपद्मसरसीं शरणागतस्य
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 3

संसार जाल पतितस्य जगन्निवास!
सर्वेंद्रियार्थ बडिशाग्रझषोपमस्य ।
प्रोत्कंपित प्रचुर तालुक मस्तकस्य
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 4

© 2022 Vedam Nadam

संसार कूप मतिघोर मगाधमूलं
संप्राप्य दुःखशत सर्पसमाकुलस्य ।
दीनस्य देव! कृपया पदमागतस्य
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 5

संसार भीकर करींद्र कराभिघात
निष्पीड्यमान वपुषः सकलार्तिनाश ।
प्राणप्रयाण भवभीति समाकुलस्य
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 6

संसार सर्प विषदिग्ध महोग्र तीव्र
दंष्ट्राग्र कोटि परिदष्ट विनष्टमूर्तेः ।
नागारिवाहन! सुधाब्धिनिवास! शौरे!
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 7

संसारवृक्ष मघबीज मनंतकर्म
शाखायुतं करणपत्र मनंग पुष्पम् ।
आरुह्य दुःखफलितं चकितं दयाळो!
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 8

संसार सागर विशाल कराळ काल
नक्र ग्रह ग्रसित निग्रह विग्रहस्य ।

© 2022 Vedam Nadam

व्यग्रस्य रागनिचयोर्मि निपीडितस्य
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 9

संसार सागर निमज्जन मुह्यमानं
दीनं विलोकय विभो! करुणानिधे! माम् ।
प्रह्लादखेद परिहार परावतार!
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 10

संसार घोर गहने चरतो मुरारे!
मारोग्र भीकर मृग प्रचुरार्दितस्य ।
आर्तस्य मत्सर निदाघ सुदुःखितस्य
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 11

बद्ध्वा गले यमभटा बहु तर्जयंतः
कर्षंति यत्र भवपाश शतैर्युतं माम् ।
एकाकिनं परवशं चकितं दयाळो!
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 12

लक्ष्मीपते! कमलनाभ! सुरेश! विष्णो!
यज्ञेश! यज्ञ! मधुसूदन! विश्वरूप! ।
ब्रह्मण्य! केशव! जनार्दन! वासुदेव!
लक्ष्मीनृसिंह मम देहि! करावलंबम् ॥ 13

एकेन चक्रमपरेण करेण शंखं
अन्येन सिंधुतनया मवलंब्य तिष्ठन् ।
वामेतरेण वरदाभय पद्मचिह्नं
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 14

अंधस्य मे हृत विवेक महाधनस्य
चोरैर्महाबलिभिरिंद्रिय नामधेयैः ।
मोहांधकारकुहरे विनिपातितस्य
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 15

प्रह्लाद नारद पराशर पुंडरीक
व्यासादि भागवत पुंगव हृन्निवास ।
भक्तानुरुक्त! परिपालन पारिजात!
लक्ष्मीनृसिंह! मम देहि! करावलंबम् ॥ 16

लक्ष्मीनृसिंह चरणाब्ज मधुव्रतेन
स्तोत्रं कृतं शुभकरं भुवि शंकरेण
ये तत्पठंति मनुजा हरिभक्तियुक्ताः ।
ते यांति तत्पद सरोज मखंडरूपम् ॥ 17

॥ श्री मच्छंकर भगवतः कृतं लक्ष्मीनृसिंह करावलंब स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam